**वयसि प्रथमे** (४।१।२०)

अर्थः -

कालकृतशसीरावस्था यौवनादिः वयः। प्रथमे वयसि यत् प्रातिपदिकं श्रुत्या वर्तते ततः स्त्रियां ङीप् प्रत्ययो भवति। कुमारी। किशोरी। बर्करी। प्रथमे इति किन्? स्थविरा। वृद्धा। अतः इत्येव, शिशुः। वयस्यचरम इति वक्तव्यम्। वधूटी। चिरण्टी। द्वितीयवयोवचनावेतौ। प्राप्तयौवना स्त्री अभिधीयते। कथं कन्या? कन्यायाः कनीन च इति ज्ञापकात्। उत्तानशया, लोहितपादिका इति? नैताः वयःश्रुतयः।

सिद्धान्त-कौमुदी

प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात्। कुमारी। वयस्यचरम इति वाच्यम् (वा)। वधूटी। चिरण्टी। वधूटचिरण्टशब्दौ यौवनवाचिनौ। अतः किम्? शिशुः। कन्याया न। न्यायाः कनीन च इति निर्देशात्।